# Shiva Stuti by Mankanaka and Siddheshvaralinga Varnanam

# મઙ્ખુણકકૃતા શિવસ્તુતિરેવં સિદ્ધેશ્વરલિઙ્ગવર્ણનમ્

## Document Information

Text title : Shiva Stuti by Mankanaka and Siddheshvaralinga Varnanam

File name : shivastutiHsiddheshvaralingavarNAnammankaNakakRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 34|| -

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2023

*sanskritdocuments.org*

# મઙ્કણકકૃતા શિવસ્તુતિરેવં સિદ્ધેશ્વરલિઙ્ગવર્ણનમ્

ઈશ્વરઃ -
તત્પ્રતીચ્યાં મહાદેવિ પ્રભાસં નામ વિશ્રુતમ્ ।
પ્રભાસે વેનિકા નામ નદી પુણ્યપ્રદા શુભા ॥ ૧॥

તત્ર શૈવવરા નિત્યં ભસિતોદ્ધૂલને રતાઃ ।
ત્રિપુણ્ડ્રભાલાઃ સતતમન્યપુણ્ડ્રવિવર્જિતાઃ ॥ ૨॥

રુદ્રાક્ષકવચાઃ સર્વે પઞ્ચાક્ષરપરાયણાઃ ।
રુદ્રાધ્યાયાર્થકથનપ્રવણાઃ શરણા મયિ ॥ ૩॥

મમ લિઙ્ગાર્ચકાઃ સર્વે બિલ્વપત્રાદિસાધનૈઃ ।
તૈઃ શિવાનર્પિતં વારિ ફલં વા નોપભુજ્યતે ॥ ૪॥

ષટ્સહસ્રં મુનીન્દ્રાણાં પ્રભાસે સમવસ્થિતમ્ ।
તત્ર મઙ્કણકો નામ પુરા સિદ્ધોઽભવન્મુનિઃ ॥ ૫॥

તેન સિદ્ધેશ્વરં લિઙ્ગં ત્રિકાલેષુ સમર્ચિતમ્ ।
બિલ્વપત્રૈશ્ચ કલ્હારૈર્નીલૈર્નીલોત્પલૈરપિ ॥ ૬॥

નૈવેદ્યૈઃ ફલમૂલાદિકલ્પિતૈઃ પરમેશ્વરિ ।
સદા મમારાધનકૃત્ સ માં તુષ્ટાવ શઙ્કરિ ॥ ૭॥

સિદ્ધેશં સર્વસિદ્ધીનામાકરં ભુવનેશ્વરિ ॥

—

મઙ્કણકઃ -
સિદ્ધેશ સિદ્ધગણપૂજ્યપદાબ્જયુગ્મમદ્યૈતદેકમનિશં દયયા દદસ્વ ।
મુગ્ધેન્દુચૂડ મયિ સિદ્ધિગણં ત્વદીયૈઃ (?) સિદ્ધોઽસ્મિ મોચય મહાઘસુપાશબદ્ધમ્ ॥ ૮॥

બુદ્ધિં પ્રસારય મહેશ સુખાય શમ્ભો ત્વત્પાદપૂજનવિધૌ દૃઢભક્તિયુક્તામ્ ।
સક્તાં સુદારતનયાદિધનાદિકેષુ ધાન્યેષુ ગોષુ ગૃહવર્ણગણેષુ મુક્તિમ્ ॥ ૯॥

દેહિ પ્રસીદ પરમેશ્વર પઞ્ચવક્ત્ર લોકેશમેતિ નિખિલં સહભૂતવર્ગૈઃ ।
વૈમાનિકાશ્ચ સકલાઃ સસુરાશ્ચ લોકાઃ કાલસ્ત્વમીશ વડવામુખસન્નિભોઽબ્ધૌ ॥ ૧૦॥

ક્ષેત્રોત્તમં મુનિવરૈઃ સેવિતં શામ્ભવોત્તમૈઃ ।
તત્ર સિદ્ધેશ્વરં નામ્ના લિઙ્ગં મુક્તિપ્રદં મમ ॥ ૧૧॥

મદ્ભાસનાકર્ષણેન પ્રભાસમિતિ વિશ્રુતમ્ ।
હરિબ્રહ્મરુદ્રેન્દ્રસામ્રાજ્યજાલં નિકૃષ્ટં તદુત્કૃષ્ટકષ્ટૈકનિષ્ઠમ્ ।
મમેશાનલિઙ્ગાર્ચનધ્યાનતુષ્ટસ્ય લક્ષસ્થલિક્ષાયિતા દેવવર્ગાઃ ॥ ૧૨॥

—

ઈશ્વરઃ -
ઇતિ મઙ્કુણકેનેશિ સંસ્તુતોઽહં મુદા તદા ।
તમાહૂય મુનિં સિદ્ધં સિદ્ધયસ્તેઽભવંસ્ત્વયિ ॥ ૧૩॥

ઇતિ મત્તો વરં લબ્ધ્વા સ તુ મઙ્કુણકો દ્વિજઃ ।
સ્વકરાત્પયસો ધારાં નિઃસૃતાં દદૃશેઽમ્બિકે ॥ ૧૪॥

સિદ્ધિઃ પ્રાપ્તેસિ ચ મયા તસ્ય હર્ષોઽજનિ દ્રુતમ્ ।
નનર્ત સિદ્ધલિઙ્ગાગ્રે કરતાલૈઃ સ શામ્ભવઃ ॥ ૧૫॥

—

મઙ્કુણકઃ -
સ્વામિન્નન્નપતે ધનાધિપપતે હે શૈલકન્યાપતે હે
 કામાન્તક હે પુરાન્તક મહાદેવેશ માં પાલય ।
હે વિશ્વેશ્વર ભર્ગ દેવ ભગવન્ હે ચારુચામીકર-
 સ્ફારાકારશશીરશોભિત મહાસિદ્ધેશ સિદ્ધિપ્રદ ॥ ૧૬॥

હે ભીમામરનાયકાખિલમહાપાપેરુતાપં હર
 રુદ્રોગ્રામિતશઙ્કુર ત્રિપુરજાપારવ્યથાં સંહર ।
હે કાલાન્તક કાલકાલ ભવહન્ કાલાદ્ભયં સંહાર
 હે ગઙ્ગોત્તમસઙ્ગરઙ્ગિતજટાભારાર્ધચન્દ્રસ્ફુર ॥ ૧૭॥

કર્પૂરોજ્વલભૂતિભૂષ ભગવન્ માં સર્વદા પાલય
 હે ભોગીશ્વરકઙ્કણ પ્રમથયાનાથે પ્રસીદાધુના ।
હે વિશ્વાન્તક વિશ્વમેતદધુના ત્વત્તો વિભો નિઃસૃતં
 પાહિ ત્વં પરમેશ્વરેશ કૃપયા ત્વન્માયયા કલ્પિતમ્ ॥ ૧૮॥

હે લિઙ્ગાર્ચનજાતનન્દિતનિજાનન્દૈકમોદપ્રદ હે ।
બિલ્વાદિદલોત્તમાઙ્ગ ભગવન્ મત્સિદ્ધિદાતાર્ચને ॥ ૧૯॥

—

ઈશ્વરઃ -
ઇત્થં નનર્ત સ મુનિઃ સિદ્ધિવિસ્માપિતસ્તદા ।
તેન વૃત્તેન સકલં જગન્નૃત્તપરં ભવત્ ॥ ૨૦॥

સોદ્વિગ્નાસ્ત્રિદશાઃ સર્વે મુનિં તે દદૃશુસ્તદા ।
નિમીલિતાક્ષં ધ્યાયન્તં સાનન્દજલલોચનમ્ ॥ ૨૧॥

બ્રહ્મોપેન્દ્રેન્દ્રવિબુધાન્નૈવાપશ્યત્તદાઽમ્બિકે ।
સિદ્ધેશ્વરાગ્રતઃ સર્વે સ્તુવન્તં માં સુરાસ્તદા ॥ ૨૨॥

સદા સબ્રહ્મકાઃ સર્વે સિદ્ધેશં માં પ્રણમ્ય ચ ।
બિલ્વૈઃ સમ્પૂજ્ય માં સર્વે પ્રાર્થયન્તિ તદા સુરાઃ ॥ ૨૩॥

—

દેવાઃ -
ભો શમ્ભો ત્રિપુરાન્તકાન્તક મહાદેવેશ વિશ્વાધિક
    વિશ્વાશાસ્ય દયાનિધે ત્રિજગતાં નાથ પ્રસીદાવ નઃ ।
ભો ભર્ગામરધીર વીર ભગવન્ પાહીન્દુમૌળે સુરાન્
    નૃત્યે તેન મુનીશ્વરેણ ભુવનં નૃત્યન્વિનશ્યેદ્ધ્રુવમ્ ॥ ૨૪॥

અયં મઙ્કણકઃ સિદ્ધઃ સિદ્ધેશ તવ દર્શનાત્ ।
સિદ્ધિં પરમિકાં પ્રાપ્તસ્તેન નૃત્યાનિ મોહિતઃ ॥ ૨૫॥

તં નિવારય લોકેશ લોકાનાં સ્થિતિહેતવે ।
તદ્બ્રહ્મણો વચઃ શ્રુત્વા સિદ્ધરૂપ્યહમાગતઃ ॥ ૨૬॥

—

ઈશ્વરઃ -
જટામણ્ડલશોભાઢ્યસ્ત્રિપુણ્ડ્રનિટિલોલ્લસન્ ।
રુદ્રાક્ષહારવલયઃ કઙ્કણાદ્યૈશ્ચ શોભિતઃ ॥ ૨૭॥

ભસિતોદ્ધૂલિતવપુઃ સ્વર્ણવેત્રલસત્કરઃ ।
શઙ્ખખડ્ગાદિકલિતકુણ્ડલૈઃ શોભિવક્ત્રકઃ ॥ ૨૮॥

પાદુકાવિલસત્પાદો મેખલાં પાદલમ્બિનીમ્ ।

દધડ્ડુમરુકં દેવિ નાદયન્ડરબરોડમ્બરમ્ ॥ ૨૯॥

પાદકઙ્કણભૂતસ્ય ફણિનઃ શ્વાસફૂત્કૃતૈઃ ।
વૈનતેયમહાપક્ષકૃતપીડો મહેશ્વરિ ॥ ૩૦॥

તસ્યાગ્રતઃ સ્થિતો દેવિ સિદ્ધેશોઽહં મુનેસ્તદા ।
સ મુનિર્વિસ્મયાવિષ્ટો માં પ્રણમ્ય તદા સ્થિતઃ ॥ ૩૧॥

પશ્યતસ્તસ્ય મેઽઙ્ગુષ્ઠો દેવિ સન્તાડિતો મયા ।
તસ્માચ્ચ ભસ્મનો રાશિરુદભૂત પર્વતોપમઃ ॥ ૩૨॥

દેવા મઙ્કણકઃ શૈવા અદ્ભુતં દદૃશુસ્તદા ।
નૃત્તાદુપારમદ્વિપ્રો મયા પ્રોક્તઃ સ મઙ્કણઃ ॥ ૩૩॥

ગચ્છ મઙ્કણ સિદ્ધિસ્તે મત્પ્રસાદાત્પરા તવ ।
મૈવ તે વિસ્મયો ભૂયાદેતલ્લિઙ્ગં હિ સિદ્ધિદમ્ ॥ ૩૪॥

પ્રભાસે પાવને ક્ષેત્રે યો વા કો વાઽપિ માનવઃ ।
નિયતઃ સંવસેદત્ર તસ્ય સિદ્ધિઃ પરા ભવેત્ ॥ ૩૫॥

સિદ્ધિપ્રદમિદં લિઙ્ગં સિદ્ધેશાખ્યં તુ કામદમ્ ।
દર્શનાદસ્ય લિઙ્ગસ્ય સર્વાઃ સિદ્ધ્યન્તિ સિદ્ધ્યઃ ॥ ૩૬॥

પ્રભાસે મત્પ્રસાદેન સિદ્ધલિઙ્ગમુદીક્ષ્ય ચ ।
મત્સાયુજ્યમવાપ્નોતિ દેવિ સત્યં વદામિ તે ॥ ૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે પ્રભાસક્ષેત્રમાહાત્મ્યે મઙ્કણકકૃતા શિવસ્તુતિરેવં સિદ્ધેશ્વરલિઙ્ગવર્ણાનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૩૪॥ -

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 34.. -

Notes:

Prabhas Shiva Kshetra, is abode to Siddheshwara (Siddhesha) Linga and is located on the banks of River Venika (Vena). The story of Siddha Muni Mankanaka is narrated here; whereby, Shiva granted that worship at Siddheshwara Linga in Prabhas Kshetra would result in prompt acquisition of Siddhies and benefit of Shiva-Sayujya.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Shiva Stuti by Mankanaka and Siddheshvaralinga Varnanam*

pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*